# Girijakritam Shiva Stotram

# ગિરિજાકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Girijakritam Shiva Stotram

File name : girijAkRRitaMshivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 254/71-82||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 23, 2025

*sanskritdocuments.org*

# ગિરિજાકૃતં શિવસ્તોત્રમ્

નમસ્તે દેવદેવાય મહાદેવાય મૌલિને ।
જગદ્ધાત્રે સવિત્રે ચ શઙ્કરાય શિવાય ચ ॥ ૭૧॥

કપર્દિનેઽજયાદાય બ્રહ્મગર્ભાય તે નમઃ ।
હિરણ્યરેતસે તુભ્યં નીલગ્રીવાય તે નમઃ ॥ ૭૨॥

નમો બ્રહ્મણ્ય દેવાય સિતભૂતિધરાય ચ ।
પઞ્ચવક્ત્રાય રૂપાય નીરૂપાય નમો નમઃ ॥ ૭૩॥

સહસ્રાક્ષાય શુભ્રાય નમસ્તે કૃત્તિવાસસે ।
અન્ધકાસુરમોક્ષાય પશૂનાં પતયે નમઃ ॥ ૭૪॥

વિપ્રવહ્નિમુખાગ્રાય હરાય ચ ભવાય ચ ।
શઙ્કરાય મહેશાય ઈશ્વરાય નમો નમઃ ॥ ૭૬॥

અમૂર્તબ્રહ્મરૂપાય મૂર્ત્તાનાં ભાવનાય ચ ।
નમઃ શિવાય ચોગ્રાય હરાય ચ ભવાય ચ ॥ ૭૬॥

નમઃ કૃષ્ણાય શર્વાય ત્રિપુરાન્તકહારિણે ।
અઘોરાય નમસ્તેઽસ્તુ નમસ્તે પુરુષાય તે ॥ ૭૭॥

સદ્યોજાતાય તુભ્યં ભો વામદેવાય તે નમઃ ।
ઈશાનાય નમસ્તુભ્યં પઞ્ચાસ્યાય કપાલિને ॥ ૭૮॥

વિરૂપાક્ષાય ભાવાય ભગનેત્રનિપાતિને ।
પૂષદન્તનિપાતાય મહાયજ્ઞનિપાતિને ॥ ૭૯॥

મૃગવ્યાધાય ધર્માય કાલચક્રાય ચક્રિણે ।
મહાપુરુષપૂજ્યાય ગણાનાં પતયે નમઃ ॥ ૮૦॥

ગઙ્ગાધરાય મૃડિને ભવાનીપ્રિયકારિણે ।
જગદાનન્દદાત્રે ચ બ્રહ્મરૂપાય તે નમઃ ॥ ૯૧॥

ગુણાતીતાય ગુણિને સૂક્ષ્માય ગુરવેઽપિ ચ ।
નમો મહાસ્વરૂપાય ભસ્મનો જન્મકારિણે ॥ ૮૨॥

વૈરાગ્યરૂપિણે નિત્યં યોગાચાર્યાય વૈ નમઃ ।
મયોક્તમપ્રિયં દેવ સ્મરસંહારકારક ॥ ૮૩॥

ક્ષન્તુમર્હસિ વિશ્વેશ શિરસા ત્વાં પ્રસાદયે ।
શાપાનુગ્રહ એવૈષ કૃતસ્તે વૈ ન સંશયઃ ॥ ૮૪॥

મમાપરાધજો મન્યુર્ન કાર્યો ભવતાઽનઘ ।
એવં પ્રસાદિતઃ શમ્ભુર્હૃષ્ટાત્મા ત્રિદશૈઃ સહ ॥ ૮૫॥

તીર્ણવ્રતપરાનન્દનિર્ભરઃ પ્રાહ તામુમામ્ ।
ય ઇમાં મત્સ્તુતિં ભક્ત્યા પઠિષ્યતિ તવોદ્ધતામ્ ।
તસ્ય ચેષ્ટવિયોગશ્ચ ન ભવિષ્યતિ પાર્વતિ ॥ ૮૬॥

જન્મત્રયધનૈર્યુક્તઃ સર્વવ્યાધિવિવર્જિતઃ ।
ભુક્ત્વેહ વિવિધાન્ભોગાનન્તે યાસ્યતિ મત્પુરમ્ ॥ ૮૭॥

ઇત્યુક્ત્વા તાં મહેશોઽપિ સ્વમઙ્ગં પ્રદદૌ તતઃ ।
વૈષ્ણવં વામભાગં સા પ્રતિજગ્રાહ પાર્વતી ॥ ૮૮॥

ઇતિ શ્રીસ્કન્દપુરાણે નાગરખણ્ડે ચતુઃપઞ્ચાશત્તમાધિક-
દ્વિશતતમાધ્યાયાન્તર્ગતં ગિરિજાકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । નાગરખણ્ડ । અધ્યાય ૨૫૪/૭૧-૮૨॥

skandapurANa . nAgarakhaNDa . adhyAya 254/71-82..

Proofread by PSA Easwaran

*Girijakritam Shiva Stotram*

pdf was typeset on August 23, 2025

Please send corrections to *sanskrit@cheerful.com*